**Code No.: US-04**

Total No. of Questions : 7 Total No. of Printed Pages : 2

# स्नातकोत्तरपरीक्षाः– २०१५

## एम्.ए. – विद्वदुत्तमा – द्वितीयवर्षम्

## शास्त्रम् – अलङ्कारशास्त्रम्

### भागः – २, पत्रिका – ४

### विषयः – हर्षचरितं, सेतुबन्धं च

**दिनाङ्कः –** 29-3-2015 **गरिष्ठाङ्काः – ८०**

**समयः –** 2.30 P.M. to 5.30 P.M. Max. Marks – 80

---

**I.** १. दिवाकरमित्रकृतस्य उपदेशस्य सारं लिखत। **10**

२. महाकवेः बाणस्य कालदेशग्रन्थादिकं विवृणुत। **8**

**II.** सप्रकरणं पद्यद्वयं व्याख्यात। **2 × 5 = 10**

१. सहसा संपादयता मनोरथप्रार्थितानि वस्तूनि।
दैवेनापि क्रियते भव्यानां पूर्वसेवेव।।

२. उच्चित्योच्चित्य भुवि प्रहितनिगूढात्मदूतनीतानाम्।
विजिगीषुरिव कृतान्तः शूराणां संग्रहं कुरुते।।

३. नियतिर्विधाय पुंसां प्रथमं सुखुमुपरि दारुणं दुःखम्।
कृत्वा लोकं तरला तडिदिव वज्रं नियातयति।।

**III.** एषु वाक्यद्वयस्य सप्रकरणं भावं स्फुटयत। **2 × 4 = 8**

१. न पश्यतं पापां परलोकप्रस्थितां मामेवमतिदुः खिताम्।

२. अद्य सफलं जन्म पादपानां येषामस्मि गतो गोचरम्।।

३. देव! पिशाचनमिव नीचात्मनां चरितानि छिद्रप्रहारीणि प्रायशो भवन्ति।।

**Code No.: US-04**

**IV.** अयं गद्यभागः सप्रसङ्गं व्याख्येयः। **4**

कि नु खलु मामन्तरेणार्यः केनचिदसहिष्णुना किंचिदग्राहितः कुपितः स्यात्, उतानया दिशा परीक्षितुकामो माम्? उत तातशोकजन्मा चेतसः समाक्षेपोऽयमस्य। आहोस्विदार्य एवायं न भवति, किं वार्येणान्यदेवाभिहितमन्यदेवाश्रावि मया शोकशून्येन श्रवणेन्द्रियेण।।

**V.** १. सुग्रीवसैन्येन दृष्टमुदाधिं विशदयत। **10**

२. ग्रन्थोक्तदिशा शरदगमनं वर्णयत। **10**

**VI.** संस्कृतच्छायालेखनपूर्वकं श्लोकद्वयं व्याख्यात। **2 × 6 = 12**

१. दिट्ठ त्ति ण सद्दहिअं त्ति सबाहमन्थरं णीससिअम्।
सोअइ तुमं ति रुण्णं पहुणा जिअइ त्ति मारुई उवऊढो।।

२. वच्चन्ता अइभूमिं कड्ढिअसुहडासिवत्तवन्थावडिआ।
णवर ण चलन्ति वीअं लुअवक्खा महिहर व्व वेराबन्धा।।

३. सीहा सहन्ति बन्धं उक्खअदाढा चिरं धरेन्ति विसहरा।
ण उणा जिअन्ति पडिहआखण्डिअववसिआ खणं पि समत्था।।

**VII.** एषु अर्धपद्यद्वयस्य भावं सप्रसङ्गं स्फुटयत। **2 × 4 = 8**

१. मेत्ति व्व पमुहरसिआ णिव्वोढुं होइ दुक्करं काव्यकथा।

२. अरुणो छाअवहणो विसअं विअसन्ति अप्पणा कमलसरांसि।

३. पडिगअगन्ध इद्धा उद्धङ्कुसरुद्धमत्थअ व्व गइन्दा।